শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরিঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে পঞ্চমং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে পঞ্চমং দশকম্ ॥

## ৱিরাট্ পুরুষোৎপত্তিপ্রকারৱর্ণনম্

ৱ্যক্তাৱ্যক্তমিদং ন কিঞ্চিদভৱৎপ্রাকপ্রাকৃতপ্রক্ষযে
    মাযাযাং গুণসাম্যরুদ্ধৱিকৃতৌ ৎৱয্যাগতাযাং লযম্।
নো মৃত্যুশ্চ তদাঽমৃতং চ সমভূন্নাহ্নো ন রাত্রেঃ স্থিতিঃ
    তত্রৈকস্ত্ৱমশিষ্যথাঃ কিল পরানন্দপ্রকাশাত্মনা ॥ **5.1** ॥

কালঃ কর্মগুণাশ্চ জীৱনিৱহা ৱিশ্ৱং চ কার্যং ৱিভো
    চিল্লীলারতিমেযুষি ৎৱযি তদা নির্লীনতামাযযুঃ।
তেষাং নৈৱ ৱদন্ত্যসত্ত্ৱমযি ভোঃ শক্ত্যাত্মনা তিষ্ঠতাং
    নো চেৎ কিং গগনপ্রসূনসদৃশাং ভূযো ভৱেৎসংভৱঃ ॥ **5.2** ॥

এৱং চ দ্ৱিপরার্ধকালৱিগতা ৱীক্ষাং সিসৃক্ষাত্মিকাং
    বিভ্রাণে ৎৱযি চুক্ষুভে ত্রিভুৱনীভাৱায মাযা স্ৱযম্।
মাযাতঃ খলু কালশক্তিরখিলাদৃষ্টং স্ৱভাৱোঽপি চ
    প্রাদুর্ভূয গুণান্ৱিকাস্য ৱিদধুস্তস্যাস্সহাযক্রিযাম্ ॥ **5.3** ॥

মাযাসন্নিহিতোঽপ্রৱিষ্টৱপুষা সাক্ষীতি গীতো ভৱান্
    ভেদৈস্তাং প্রতিবিংবতো ৱিৱিশিৱান্ জীৱোঽপি নৈৱাপরঃ।
কালাদিপ্রতিবোধিতাঽথ ভৱতা সঞ্চোদিতা চ স্ৱযং
    মাযা সা খলু বুদ্ধিতত্ত্ৱমসৃজদ্যোঽসৌ মহানুচ্যতে ॥ **5.4** ॥

তত্রাসৌ ত্রিগুণাত্মকোঽপি চ মহান্ সত্ত্ৱপ্রধানঃ স্ৱযং
    জীৱেঽস্মিন্ খলু নির্ৱিকল্পমহমিত্যুদ্বোধনিষ্পাদকঃ।

চক্রেঽস্মিন্ সৱিকল্পবোধকমহন্তত্ত্বং মহান্ খল্ৱসৌ
সম্পুষ্টং ত্রিগুণৈস্তমোঽতিবহুলং ৱিষ্ণো ভৱৎপ্রেরণাৎ॥ **5.5**॥

সোঽহং চ ত্রিগুণক্রমাৎ ত্রিৱিধতামাসাদ্য ৱৈকারিকো
ভূযস্তৈজসতামসাৱিতি ভৱন্নাদ্যেন সত্ত্বাত্মনা।
দেৱানিন্দ্রিযমানিনোঽকৃত দিশাৱাতার্কপাশ্যশ্ৱিনো
ৱহ্নীন্দ্রাচ্যুতমিত্রকান্ ৱিধুৱিধিশ্রীরুদ্রশারীরকান্॥ **5.6**॥

ভূমন্ মানসবুদ্ধ্যহঙ্কৃতিমিলচ্চিত্তাখ্যৱৃত্ত্যন্ৱিতং
তচ্চান্তঃকরণং ৱিভো তৱ বলাৎ সত্ত্বাংশ এৱাসৃজৎ।
জাতস্তৈজসতো দশেন্দ্রিযগণস্তত্তামসাংশাৎপুন -
স্তন্মাত্রং নভসো মরুৎপুরপতে শব্দোঽজনি ৎৱদ্বলাৎ॥ **5.7**॥

শব্দাদ্ব্যোম ততঃ সসর্জিথ ৱিভো স্পর্শং ততো মারুতং
তস্মাদ্রূপমতো মহোঽথ চ রসং তোযং চ গন্ধং মহীম্।
এৱং মাধৱ পূর্ৱপূর্ৱকলনাদাদ্যাদ্যধর্মান্ৱিতং
ভূতগ্রামমিমং ৎৱমেৱ ভগৱন্ প্রাকাশযস্তামসাৎ॥ **5.8**॥

এতে ভূতগণাস্তথেন্দ্রিযগণা দেৱাশ্চ জাতাঃ পৃথঙ্ -
নো শেকুর্ভুৱনাণ্ডনির্মিতিৱিধৌ দেৱৈরমীভিস্তদা।
ৎৱং নানাৱিধসূক্তিভির্নুতগুণস্তত্ত্বান্যমূন্যাৱিশং -
শ্চেষ্টাশক্তিমুদীর্য তানি ঘটযন্ হৈরণ্যমণ্ডং ৱ্যধাঃ॥ **5.9**॥

অণ্ডং তৎখলু পূর্ৱসৃষ্টসলিলেঽতিষ্ঠৎ সহস্রং সমাঃ
নির্ভিন্দন্নকৃথাশ্চতুর্দশজগদ্রূপং ৱিরাডাহ্ৱযম্।
সাহস্রৈঃ করপাদমূর্ধনিৱহৈর্নিশ্শেষজীৱাত্মকো
নির্ভাতোঽসি মরুৎপুরাধিপ স মাং ত্রাযস্ৱ সর্ৱামযাৎ॥ **5.10**॥

॥ ইতি শ্রীমন্নারাযণীযে পঞ্চমং দশকং সমাপ্তম্॥